# साहित्यशिक्षणविधयः

**डॉ. अमृता कौर**
सहायकाचार्या, शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतसंस्थानं जयपुरपरिसरः
जयपुरम्. राजस्थानम्

शब्दार्थयोः सहितस्य भावः साहित्यम् । शब्दार्थयोः सममनोहारिणीस्थितेः नाम साहित्यम् अत एव कुन्तकेन प्रोक्तं यत्–

**साहित्यमनयोः शोभाशालितां प्रति काप्यसौ ।**
**अन्यूनानतिरिक्तत्वमनोहरिण्यवस्थितिः।।**

शब्दः, अर्थगौरवानुरूपं भवेत् न तु न्यूनं नैव चाधिकम् । तथा च अर्थोऽपि शब्दसौन्दर्यानुरूपं भवेत् न तु न्यूनं नैव चाधिकम् । इयमेव शब्दार्थयोरन्यूनातिरिक्तत्व-मनोहारिण्यवस्थितिरस्ति । अयमेव शब्दार्थयोः साहित्यमस्ति । भामहेनापि उक्तम् –

**उपकारकत्वादलंकारः सप्तममङ्गमिति ।**
**पञ्चमीसहित्यविद्या इति यायावरीयाः ।।**

इदमुच्यते यच्छिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषां वेदोपस्कारकत्वात् तदङ्गत्वं यथा सिद्ध्यति तथैवालङ्कारशास्त्रस्यापि वेदोपकारकत्वात्सप्तमं वेदाङ्गत्वं सिद्ध्यति । एवमेव आन्वीक्षिकीत्रयी-वार्ता-दण्डनीतिश्चेति चतस्रो विद्याः प्रसिद्धाः तथैव साहित्यविद्या च पञ्चमी । सत्यमेवैतद्यदलंकारशास्त्रं काव्यस्वरूपविवेचकत्वाल्लौकिकसाहित्यसम्बद्धं, किन्तु तत्प्रयोजनी-भूतस्य काव्यसाहित्यस्य तु कान्तासम्मिततया प्रवृत्ति-निवृत्त्युपदेशद्वारेण भावशोधनपूर्वकं सुकुमारमतीनामपि प्रतिभाविशदीकरणेन वेदशास्त्रादौ सम्मुखीकरणाद्वेदाङ्गत्वं सिद्ध्यत्येव । एवञ्च काव्यविद्या विद्यायाः पञ्चमाङ्गत्वमाप्नोति ।

## पारम्परिकशिक्षणपद्धतयः (Traditional Methods)

प्रागग्रे साहित्यशास्त्रशिक्षणार्थम् अनेकेषां विधीनां प्रयोगः प्रचलितः आसीत् तेषु विधिषु साहित्यशिक्षणार्थं प्रमुखाः प्राचीनविधय उत्तमोत्तमाः सन्ति ते चाधोलिखिताः -

## 1 व्याख्याविधिः

संस्कृतजगति अनेन अतिप्राचीनविधिना सर्वविधानंशान् समग्ररूपेण पाठयितुं शक्यन्ते । तादृशव्याख्याविधेः स्वरूपं श्लोके प्रदर्शितं यत् -

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना ।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं स्मृतम् ॥**

अनेन विधिना श्लोकस्य पदच्छेदं विधाय, तदनु श्लोके विद्यमानपदानामर्थं विवृत्य, सकलपदानि विग्रहमाध्यमेन संकथ्य, एकवाक्यरूपेण विषयः प्रतिपाद्यते । ततश्च आक्षेपेण वाक्यार्थे ज्ञाते काव्यदोषा परिसमाधानमिति तद्दोषनिवारणोपायज्ञानम् च ।

## 2. प्रत्यक्षविधिः

नेत्रश्रवणेन्द्रियाभ्यां सर्वे अधिकाधिकं ज्ञानं प्राप्नुवन्ति । अतः प्रत्यक्षविधौ इन्द्रियार्थसन्निकर्षजन्यज्ञानस्य प्राधान्यं दीयते । अतः एषः विधिः सगुम-निर्बाधमातृत्वेन अभिधीयते । सहस्रवर्षेभ्यः विधिरयमध्यापने प्रयुज्यत इत्यत्र उपलभ्यन्ते नैकानि प्रमाणानि न्यग्रोधबीजप्रदर्शनेन अणोः महदारम्भकत्वनिरूपणमुखेन एतद्विधप्रयोगप्रामाण्यं दर्शयति छान्दोग्यपनिषद् - न्यग्रोध फलमद । इदं भगव इति । इत्यादिना ।

## 3. गीतनाट्यविधिः

अस्मिन् विधौ क्रीडायाः अधिकप्रामुख्यं विद्यते । अध्ययनं क्रीडाद्वारा भवति चेत् अप्रयत्नेन अनायासेन विषयान् जानीयुः यतोहि बालस्तावत् क्रीडासक्त इति आदिशङ्कराचार्यस्य वचनम् । विधिरेषः काव्यपाठनार्थमुपयुक्तः । विधेरनुसारं ताल-लय-गति-यत्यनुसारं अध्यापकः छात्रान् अनुगातुं प्रोत्साहयति । अतः प्रस्तुतविधिद्वारा बृहत्समूहे छात्राः सुरागाभिनयपूर्वकं श्लोकान् पठितुं प्रभवन्ति ।

## 4. टीकाविधिः

काव्यादीनां पठने टीकानामक्षरशः पांक्तमध्यापनं कार्यते । तस्मादेव पारम्परिकपद्धतौ काव्यनामध्यापने तट्टीकानामपि नामोल्लेखः क्रियते । “टीक्यते अवगम्यते वा अनयेति टीका” इति शब्दव्युत्पत्त्या एव ज्ञायते तस्य महत्त्वं कियदिति । संक्षिप्ता व्याख्यैव टीकेति उच्यते । काव्यादिषु व्याख्यानवसरे मल्लिनाथप्रभृतयः पद्धतिमिमां समाश्रयन् । तत्र प्रसङ्गानुसारं शब्दव्युत्पत्तिः,

व्याकरणनियमाः कोशानामुद्धरणेन अर्थप्रतिपादनं, शास्त्रान्तप्रदर्शनम्, पुराणादि कथानां वा काव्यलक्षणानां वा समुल्लेखा इत्यादीनाम् उद्घाटनपुरस्सरं टीकाः लिखिताः भवन्ति।

**5. समीक्षाविधिः**

साहित्यशिक्षणार्थं सर्वोत्कृष्टः विधिरेषः। अस्मिन् विधौ छात्रेभ्यः समीक्षानियमाः पाठ्यन्ते। एवम् अध्यापकः स्वयं द्वित्रश्लोकानां समीक्षाकरणाय प्रारम्भिकस्तरे अभ्यासं कारयति। पश्चात् स्वातन्त्र्येण समीक्षां कर्तुं प्रोत्साहयति। प्रारम्भिकस्तरे कक्षायामेव क्रियते। अनन्तरं गृहे कृत्वा आगमनार्थं कथयति। कक्षायां द्वित्रछात्रैः कृतां समीक्षां श्रुत्वा अविशिष्टान् छात्रान् सूचयति यत् चर्चितविषयान् अतिरिच्य समीक्षा कृता चेद्वदन्तु इति। अयम् अध्यापकः आदर्शसमीक्षां कृत्वा स्वीय पुस्तिकासु परिमार्ष्टुं सूचयति। अनन्तरदिने छात्रैः लिखितपुस्तकानि एकत्रीकृत्य लेखन्या संशोधनं कुर्वन् स्वकीयाभिप्रायान् च लिखति। संशोधनात्परं पुस्तकानि छात्रेभ्यः प्रत्यर्पयति। विधिरसौ सनात्तकोत्तरकक्ष्यायाः कृतेऽपि उपयुज्यते। काव्यानां शैली, छन्दोऽलङ्कारकल्पनाविचाराणां विभिन्नतत्त्वानां गम्भीरसमालोचनात्मकाध्ययनार्थं विधिः प्रामुख्येन पुराकाले प्रायुज्यत।

**6. अनुवादविधिः**

शिक्षापद्धतिः कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वमितवत्-मातृभाषया शास्त्राणि अभ्यसितुं प्रायतन्त जनाः विषयस्य शिक्षणं अनुवादमाध्यमेन (आङ्ग्लभाषया उत प्रादेशिकभाषया) कुर्वन्ति। अनुवादमाध्यमेन शिक्षणेन भाषायाः विभिन्नानि कौशलानि छात्रेषु न विकसन्ति। अनेन विधिना अध्यापनेन छात्रेषु भाषाज्ञानं न विकसत्येव) अनेन अध्यापकः संस्कृतपद्यस्थ पदच्छेदं कृत्वा, अन्वयमुक्त्वा, प्रत्येकं शब्दस्यार्थं मातृभाषायां वदति। ततः पद्यस्य भावं विवृणोति। प्रारम्भिकस्तरे अन्वयकाठिन्ये सति असौ विधिः आश्रणीयः भवति।

**7. वाकोवाक् विधिः / भाष्यविधिः**

सूत्रवार्तिकयोः व्याख्यानभूते महाभाष्ये भगवता पतञ्जलिना समाहिता उक्तिप्रत्युक्तिरूपा पद्धतिः वाकोवाक्यपद्धतिरितित्युच्यते। व्याख्याप्रणाल्याः विस्तृतं रूपं भवति भाष्यप्रणाली भाष्यप्रणालीमेव व्यासप्रणालीत्यपि च उच्यते। पतञ्जलिमहर्षेः व्याकरणमहाभाष्यं, ब्रह्मसूत्राणां, उपनिषदां, श्रीमद्भगवद्गीतायाश्च प्रसिद्धैराचार्यैः प्रणीतानि भाष्याणि च संस्कृतवाङ्मये उपलभ्यन्ते। पद्धत्यनुगुणमध्यापकेन श्लोकस्य (काव्यदृष्ट्या शब्दशक्तयः, अलङ्काराः) विस्तृतव्याख्या क्रियते।

श्लोके विद्यमानस्य प्रत्येकशब्दस्य अर्थः भाव-विशेषतो इत्यादीः टिप्पणी दीयते । आचार्यैः स्वसिद्धान्तप्रतिपादनाय अनेके लोकव्यवहाराः, पौराणिककथाश्च उदाह्रियन्ते । न्यायानां, सूक्तीनां दृष्टान्तानाञ्च प्रतिपादनेन स्वविचाराः सिद्धान्तीक्रियन्ते । एवं कविजीवनविशेषाः शैली पद्ये वर्णिततत्त्वविचाराः च प्रतिपाद्यन्ते। रामायणभागवतादीनां व्याख्याने पौराणिकैरपि इयं प्रणाली आश्रीयते। व्यासपीठे उपविश्य प्रवचन-व्याख्यतृवत् साभिनयपूर्वकं कथामाध्यमेन प्रतिविषयं पाठ्यते अतः भाष्यपद्धतीत्यप्युच्यते।

## 8. तुलनाविधिः

कस्यचित् कवेः काव्यविशेषान् ज्ञातुं तुलनात्मकदृष्ट्या मूल्याङ्कनं कर्तुम् अयं विधिः अत्यन्तमुपकरोति। व्याख्यादिविधीन् उपयुज्य पाठनान्तरं अध्यापितकवित्वभाव-सम्मिलितानि अन्यानि काव्यतत्त्वानि कवितत्त्वानि अथ वा श्लोकाः छात्राणां समक्षे प्रस्तुताः भवेयुः । प्रक्रिया चतुष्प्रकारिका भवति यथा-

- अध्यापितकवित्वकर्त्रा लिखित कविताभि सह।
- तेनैव कविना लिखितान्यभाषाविशेषैः सह।
- भिन्नकविना समभाषया लिखितकविताभिः सह।
- भिन्नकविद्वारा भिन्नभाषया लिखितभिन्नकविताभिः सह।

यस्य कस्यापि कवेः पद्यस्य व्याख्यानसन्दर्भे तस्यैव कवेः अथवा अन्यकवीनां पद्यस्य भावेन, रचनाशैल्या वा तुलना प्रस्तूयते । एवं समानदृष्ट्या भिन्नदृष्ट्या च विभिन्नकाव्यानां, कवितानाञ्च विचारधाराणां रचनाशैलीनाञ्च तुलनात्मकमध्ययनं भवति।

## 9. कथाकथनविधिः

पितृभक्ति-श्रवणकुमारकथा, सत्यवादि-हरिश्चन्द्रः, दानवीरकर्णः पुराणकथा साहित्यिककथाश्च पञ्चतन्त्रम्, हितोपदेशः, कादम्बरी, दशकुमारचरितम् इत्यादिग्रन्थेषु बहव्यः कथाः सन्ति। तासां कथानां बोधनाय अयं विधिः अतीवोपयुक्ताः भवति। विधौ अस्मिन् अध्यापकः आदौ सम्बद्धां कथां (स्वीकृतां कथां) श्राव्येत् । ततः तद्गतां कथां छात्रेभ्यः निष्कायेत्। एवं कथाकथनविधिना साहित्यशास्त्रग्रन्थेषु विद्यमानाः कथाः पाठयितुं शक्यन्ते।

## 10. प्रसङ्गविधिः

केषाञ्चित् शब्दानां व्याख्यानाय ऐतिहासिक-भौगोलिक- पौराणिक-साहित्यिक-नाट्यशास्त्रे प्रसिद्धाः विषयाः वास्तविकसंघटना वा प्रसङ्गानुसारेण वर्णनीयाः । संस्कृतसाहित्यस्य दुरूह्याः विषयाः एकपदे निहिताः कथाश्च स्पष्टीकर्त्तव्याः । एतेन सांस्कृतिकमुद्देश्यं सिद्ध्यति ।

## 11. दण्डान्वयविधिः

विधिरयं पद्यान्वयबोधनार्थं प्रयुज्यते । अन्वयबोधनार्थं परम्परया द्वौ विधी आश्रीयेते । तयोः अन्यतरस्य दण्डान्वयविधेः लक्षणम् ओङ्कारदासेन अन्वयप्रबोधनामके ग्रन्थे इत्थमुक्तम्-

**आद्ये विशेषणं योज्यं विशेष्यं तदनन्तरम् ।**
**क्त्वाणमुल्यप्प्रभृत्येवं पूर्वं दण्डान्वये भवेत् ॥**

श्लोके विद्यमानं वाक्यमन्वेष्टव्यम् कर्तृकर्मक्रियाक्रमेण । तदनन्तरं (कर्तृपदात्प्राक् कर्तृविशेषणानि, एवं कर्म, क्रियापदानां, विशेषणपदानि च क्रमरूपेण समायोजनीयानि।) कर्तृपदं तद्विशेषणानि, करणं, कर्म अन्ते क्रियापदञ्च स्थाप्यते । पश्चात् क्त्वा, णमुल, ल्यप् इत्यादीनि यथा स्थानं निवश्यन्ते । एवं प्रकारेण श्लोकगतपदानि यत्र वाक्यरूपेण परिवर्तितानि भवन्ति सा प्रक्रिया दण्डन्वयपद्धतिः इति कथ्यते । अत्र सन्धिसमासादीनां विवरणं कृत्वा कठिनपदानाम् अर्थबोधयति। अन्वयं सम्पादयितुं मातृभाषायां प्रश्नाः पृच्छयन्ते । अतः प्रधानवाक्यज्ञानाय विभक्तीनां प्रत्ययानाञ्च ज्ञानमाश्यकम् । अनेन ज्ञायते यत् अस्मिन् विधौ व्याकरणस्य प्रधानं स्थानं वर्तते अतः विधिरयम् उन्नतकक्षासु आश्रयणीयः ।

## 12. खण्डान्वयविधिः

मनोवैज्ञानिकसिद्धान्तानामाधारितः एषः विधिः छात्रेष्वासक्तिं जनयति । विधिरयं दण्डान्वयविधेः विपरीततया भवति । दण्डान्वये व्याकरणस्य प्राधान्यमत्र खण्डान्वये साहित्यस्य प्राधान्यं वर्तते । यथा-

**कर्तृकर्मक्रियास्तावतच्छलोके योज्यास्ततः परम् ।**
**किमो रूपं पुरस्कृत्य तृतीयादि नियोजयेत् ॥**
**ल्यबन्तं च तुमुन्तञ्च क्त्वान्तं कर्मविभूषितम् ।**
**खण्डान्वये पुनः प्रश्नं पूर्वमन्ते नियोजयेत् ॥**

प्रधानवाक्यमन्विष्य तत्र प्रधानपदाधारेण प्रश्नानाम् एवं समाधानानां द्वारा वाक्यशेषांशज्ञानसम्पाद्यते। कर्तृसम्बद्धान् अंशान् छात्रेभ्यः निष्कासनाय कः, कम्, केन, कस्मै, कस्मात्, कस्य इत्यादीनां सर्वनामशब्दानां विशेषणानां ज्ञानाय कीदृशम्, किं भूतम्, कथं भूतम्, पुनः कीदृशमित्यादयः क्रियाविशेषणानां ज्ञानाय कुतः, कुत्र, कदा, कथं, किमर्थं, किं कृत्वा, इत्यादीनि प्रश्नाः प्रष्टव्याः । खण्डं कृत्वा पाठ्यते अतः सरलरूपेण ज्ञायते । छात्राः सक्रियाः भवन्ति । खण्डान्वयतः दण्डान्वयः सम्पादयितुं शक्यते।

यद्यपि एते प्राचीनविधयः उत्तमा एव तथापि काले गच्छति कालानुगुणं नवीनानां विधीनामपि ज्ञानमनिवार्यं वेविद्यते।

**संस्कृतसाहित्यक्षेत्रे नवीनविधयः**

**(New Methods for Field of Sahitya-Shastram)**

नवीनविधीनां प्रयोगेण भाषायाः विकासः सरलतयी सुकरतया स्पष्टतया भवितुमर्हति। एभिः विधिभिः चतुर्णां कौशलानां विकासः झटित्यैव क्रियते । एते विधयः अध्यापकशिष्ययोः विषयसारल्यमानयन्ति। शिक्षाशास्त्रजगति संस्कृतसाहित्यशास्त्राधिगमे नवीनविधयः एवं प्रकारेण विभक्तुं शक्यन्ते यथा- सङ्गणकाधारितविधयः, मनोवैज्ञानिकाधारितविधयः । तेषु विधीषु प्रत्यक्षविधिः, सुबोधकक्षाविधिः, online tests इत्यादयः सङ्गणकाधारिताः विधयः आधुनिकपरिप्रेक्ष्ये दृश्यन्ते प्रयुज्यन्ते च। एवमेव अत्यन्तमाधुनिकविधयः कक्षायां सारल्येन एते आधुनिकविधयः प्रयोक्तुं शक्यन्ते यथा

1. मस्तिष्कचक्रवातः Brain storming
2. उद्घाटितान्तोद्दीपकविधिः Open ended stimulus
3. उद्दीपनविधिः Stimulations
4. बहुमुखीकृतकक्षा Multi touch class room
5. सुबोधदुरवाणी Smart phone
6. भाषातन्त्राणि Language software
7. अन्तर्जालप्रात्यक्षकभाषाभ्यासः Online practice of Language
8. भाषणस्य मुद्रणं कृत्वा दोषाणामभिज्ञापनम् Cell phone, videos, recorders

9. भाषणचिकित्साविधिः Speech therapy

इत्यादयः । एतेषु प्रमुखाः मनोवैज्ञानिकसङ्गणकाश्रितविधयः अत्र निरूप्यन्ते ।

## 1. **मस्तिष्कचक्रवातः/ मस्तिष्कविप्लवः (Brainstorming Method)**

लोके सर्वेषां जनानां मनसि बहवः विचाराः विद्यन्ते। तेषां विचाराणां क्रमबद्धतायै व्यवस्थितलेखनाय च विधिरयमुपकरोति। अस्य विधेः कृते आङ्ग्लभाषायां प्रसिद्धोक्तिः –Getting idea before you write. अर्थात् लेखनात्प्रागुत्पन्नविचारः । अत्र छात्राः स्वविचारान् लेखितुं व्याकरणबद्धाः न भवन्ति । अतः छात्राः विषयं श्रुत्वैव मनसि झटित्यागतान् विचारान् संस्कृतभाषायां प्रकटयितुं शक्नुवन्ति । यदि संस्कृतक्षेत्रे अस्य प्रयोगः क्रियते चेत् अनेन संस्कृतस्य कौशलानां विकासः सरलतया कर्तुं शक्यते । पश्चात् तेषां भाषादोषाः क्रमशः न्यूनीक्रियन्ते । एनं प्रयोक्तुं त्रीणि सोपानानि सन्ति

1. गुच्छनिर्माणम् (Clustering)
2. सूचीनिर्माणम् (Listing)
3. मुक्तहस्तलेखनम् (Free Lance Writing)

अत्र गुच्छनिर्माणे विषयस्य ये उपविषयाः सन्ति ते एकत्रीक्रियन्ते । तत्पश्चात् उपविषयाणां सूचीनिर्माणम् तथा चान्ते मुक्तहस्तलेखनम् अर्थात् ये उपविषयाः विषयसम्बद्धाः विचारैः उत्पन्नाः तेषां स्वतन्त्ररुपेण लेखनं क्रियते । अनया प्रक्रियया लेखने दोषास्तु भवन्ति परं तेषां पुनरवलोकनेन निराकरणमपि क्रियते । इत्थमयं विधिः संस्कृतनिबन्धलेखने, भाषणलेखने, काव्यरचनायाञ्च महदुपकरोति । अर्थात् अनेन लेखन-अभिव्यक्तिकौशलयोः विकासः सम्भवति।

## **2. उद्दीपनविधिः (Stimulation Method)**

संस्कृतसाहित्यशास्त्रे रुचिमुत्पादयितुं तथा सामान्यजनान् संस्कृतसाहित्यशास्त्रपठनार्थं प्रेरयितुं च अयं विधिः अत्यन्तमुपकरोति । संस्कृतसाहित्यशास्त्रजगति केषाञ्चन प्रसिद्धजनानां नेतृत्वाभिनयसम्पादनेन संस्कृतक्षेत्रे समीचीनतया स्वविषयमुपस्थापयितुं शक्यते। संस्कृतक्षेत्रे के विद्वांस आसन् तथा च तेषां व्यक्तित्वविषयं कृतित्वविषयञ्चाधीत्य गहनाध्ययनाय साहाय्यमाचरति । संस्कृतस्य

भाषणकौशलविकासाय विधिरयं श्रेष्ठः । यतोहि अभिनयस्तु व्याकरणरहितः परन्तु अवगमनसमर्थः । अनेन कोऽपि भावाभिनयमाध्यमेन समीचीनतया विषयमवगन्तुं शक्नोति।

### 3. उद्घाटितान्तोद्दीपनविधिः (Open ended stimulation Method)

विधावस्मिन् संस्कृतभाषासम्बद्धः विषयः अपूर्णप्रश्नत्वेन दीयते। तस्य प्रश्नस्य सम्पूर्णोत्तरं लेखितुं स्वविचाराः संस्कृते प्रकटनीयाः भवेयुः। प्रश्नः व्यक्तिगतरूपेण प्रष्टव्यः। कस्यापि प्रश्नस्योत्तररूपेण जनानामनुभवाः एव स्वबुद्धिकौशलत्वेन व्यवस्थितविचारत्वेन आविष्कृताः भवन्ति । प्रश्नस्य स्वरूपमेवं प्रकारेण भवितुमर्हति यथा- यद्यहं संस्कृतप्रचारकः भवामि चेत्...........। अयञ्च विधिः त्रिप्रकारकत्वेन विभक्तुमर्हति -

1. व्यक्तिगतापूर्णप्रश्नः
2. अपूर्णकथा
3. अज्ञातचित्रस्य कृते स्वविचारप्रकटनम्

चतुर्विधकौशलानां त्रयाणां शिक्षणस्तराणाञ्च विकासाय नवीनविधीनां ज्ञानम् भवेत् । तथा च तेषां प्रयोगप्रक्रियायाः विषये अवधानं दीयते चेत् संस्कृतक्षेत्रम् इतोऽपि विस्तृतं कर्तुं शक्यते । वर्तमाने अनेकसां भाषाणां विकासाय नूतनविधीनां प्रयोगः क्रियमाणः वर्तते । संस्कृते इदानीं पर्यन्तमपि तेषां नवीनविधिनां प्रयोगस्तु दुर्लभैव दृश्यते । एतदर्थं संस्कृतक्षेत्रे गुणसंवर्धनाय नवीनपद्धतयः बहूपकुर्वन्ति । नवीनपद्धतयः संस्कृतं व्यवहारे आनेतुं साहाय्यमाचरन्ति । एवं प्रकारेण मनसि संस्कृतभाषया आगतान् विचारान् सुव्यवस्थीकर्तुं तथा संस्कृतेन लेखनाय, भाषणाय, पठनाय, श्रवणाय (अवगमनाय) च एताः पद्धतयः साहाय्यं कुर्वन्ति । एभिः विधिभिः संस्कृतस्य विकासः सरलतया स्पष्टतया च कर्तुं प्रभवति । पुराणमित्येव न साधु सर्वम् इत्यार्योक्त्या सर्वदा पारम्परिकविधय एव प्रयोक्तव्याः अथवा आधुनिकविधयः एव प्रयोक्तव्याः इति नास्ति नियमः । यथावसरं यथासमयं यथोचितं तथा विधीनां प्रयोगः संस्कृतरक्षणाय संभवति।